IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# आधुनिकसंस्कृतसाहित्ये वङ्गदेशीयानां कवयित्रीणाम् अवदानम्

**Pabitro Barman, Research Scholar at Jawaharlal Nehru University, New Delhi-110067**

**शोधसारः** - वैदिकयुगात् अद्यतनकालं यावद् देवीनां संख्या यथा देशेऽस्माकं संस्कृतावस्यां च प्रविरलैव संदृश्यते, तथैव प्राचीनकालादेव कवयित्रीणां संख्यापि स्वल्पीयसीत्यत्र नास्ति अस्वाभाविकत्वम्। प्राचीनशास्त्रेषु अनेकासां कवयित्रीणां नामानि श्रूयन्ते। शौनकस्य बृहद्देवतायां सप्तविंशतिसंख्यकानां ब्रह्मवादिनीनाम् उल्लेखोऽस्माभिः समुपलभ्यते-

"घोषा गोधा विश्ववारा अपालोपनिषन्निषत्।
ब्रह्मजाया जुहूर्नाम अगस्त्यस्य स्वसादिति।।
इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी।
लोपामुद्रा च नद्यश्च यमी नारी च शश्वती।
श्रीर्लाक्षा सार्पराज्ञी वाक् श्रद्धा मेधा च दक्षिणा।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः।।"[1]

मध्य-आधुनिककालतः (चतुर्थशतकात् विंशतिशताब्दीं यावत्) अनेके महिलाशिक्षिताः विद्वांसः सन्ति, ये संस्कृतसाहित्यस्य संस्कृतेः च विकासं कृतवन्तः । अस्य कालस्य भावदेवी, चिन्नम्मा, सरस्वती, शिलाभट्टरिका, सीता, बिज्जा, बीकालीताम्बा, मदलसा, मरुला, मोरिका, गंगादेवी, विश्वासदेवी, वीणाबाई, प्रियंबदा, पद्मावती, तिरुमलम्बा, रामभद्रम्बा, देवकुमारी,लक्ष्मी, राजकुमारी इत्यादयः प्रसिद्धाः कवयः सन्ति। बंगाली रमाचौधरी, बेलादेवी, अर्चनापुरी, जयश्रीनाग च गौरीधर्मपाल। एताभिः महिलाकविभिः स्वपुस्तकेषु समकालीनकालस्य आर्थिकसामाजिकराजनैतिकादिस्थितेः सजीवचित्रं रचितम् अस्ति। भारते विशेषतः स्वातन्त्र्योत्तरकाले संस्कृतमहिलाकविनां संख्या अल्पा एव।

**कूटशब्दः** - वङ्गदेशीयकवयित्री, समसामयिकविषयः, वैचित्र्यपूर्णं कथावस्तु, नवीनाशैल्या, आधुनिकपरम्पराः।

**भूमिका:** - आधुनिकसंस्कृतसाहित्ये भारतवर्षस्य प्रदेशान्तराणामिव वङ्गदेशीयाकवयित्रीणाम् अभूतपूर्व योगदानां सन्ति। वङ्गेप्रदेशे विंशशतकस्य आधुनिकसंस्कृतसाहित्ये याः खलु कवयित्र्यः सर्वाधिकतया प्रशंसापदवीं गतास्ताः खलु रमाचौधुरी-

[1] वृहद्देवता.२।८२.८३

बेलादेवी-अर्चनापुरी गौरीधर्मपालाः-जयश्रीचट्टोपाध्याय-जयश्रीनागाः विशिष्टाः । आधुनिकसंस्कृतसाहित्ये तासां सारस्वतदानानि सम्यक्तयालोच्यन्ते।

**वङ्गदेशीयाः कवयित्रीणाम् अवदानम्** -

**रमाचौधुरी** - सुधांशुमोहनवसुमहोदयस्य कन्यारूपेण १९११ ईशवीयाब्दे रमाचौधुरी सा जातः। अभिजातवंशे समुत्पन्नाया रमायाः छात्रजीवनं प्रतिभापूर्णाभिरुपलब्धिभिः मण्डितं विद्यते।रमाचौधुरी प्रसिद्धनाट्यकारः यतीन्द्रविमलस्य पत्नी अस्ति।रमाचौधुरी सार्धमेवाधीत्य ‘Oxford' विश्वविद्यालयस्य डी. फिल. इत्युपाधिमुपालेभे। सा त्रिंशद्वर्षाणि यावद् ब्रावोर्ण-महाविद्यालये प्राचार्यपदमलंकृतवती। ततः सप्त वर्षाणि यावद् रवीन्द्रभारतीविश्वविद्यालये प्रथममहिलोपाचार्यत्वेन प्रशासनकार्यं कृतवती।

अर्वाचीनसंस्कृतसाहित्ये सा उल्लेखयोग्या प्रोढा चासीत् लेखिका। अनेकेषां समालोचकानां मते, कवयित्रीषु अर्वाचीनसंस्कृतनाट्यसाहित्येतिहासे सैव नाट्यकाररूपेण प्रथमा। सा खलु विंशत्यधिकसंस्कृतनाट्यानां रचयित्री। तानि यथा- कविकुलकोकिलम्, कविकुलकमलम्, मेघमेदुरमेदनीयम्, यतीन्द्रयतीन्द्रम्, शङ्करशङ्करम्, देहदीपम्, पल्लीकमलम्, युगजीवनम्, निवेदितानिवेदितम्, अभेदानन्दम्, रामचरितमानसम्, रसमयरासमणिः, चैतन्यचैतन्यम्, संसारामृतम्, नगरनूपुरम्, भारतपथिकम्, भारताचार्यः, अग्निवीणानाटकम्, गणदेवतानाटकम्, भारततातम्, प्रसन्नप्रसाद चेति।

**कविकुलकोकिलम्** - नाटकेऽस्मिन् दश दृश्यानि विलसन्ति। कालिदासस्य व्यक्तिजीवनम् आश्रित्य ग्रथितमिदं नाटकम्। मूर्खकालिदासतो महाकवित्वेन कालिदासस्य परिणतिरत्र नाट्यायितावर्तत।

इह नाटके विद्यावती विशिष्टायां स्त्रीभूमिकायामवतीर्णा संबभूव। सा मूर्ख कालिदासम् उपरेमे। परवर्तिकाले पतेः प्रकृतं स्वरूपं विज्ञाय सा कालिदासं बहुधा तिरष्कृतवती। अन्तिमे कालिदासस्य महता तपसा अर्जितेन पाण्डित्येन सा धन्याभवदिति नाट्यविषयः। अत्र भावुकतापूर्णानामेकोक्तीनामाधिक्यं राजते। तृतीयदृश्ये कालिदासस्य एकोक्तौ प्रकृत्या सह भव्यं सामञ्जस्यं विलसति। गालिदानस्याधुनिकी रीतिरप्यस्मिन् वर्तते। कवयित्री अत्र कृमि-कीट-कृकलास- शठशृगाल- बर्वर-मर्कट-गर्दभाद्यपशब्दान् प्रयुंक्ते। उज्जयिन्यां कालिदाससमारोहे १९६७ खुष्टाब्दे नाटकमिदमभिनीतं पुरस्कृतञ्च।

**कविकुलकमलम्** - 'कविकुलकमले' महाकवेः कालिदासस्योत्तरकालिकी चरितगाथा वर्तते। अस्मिन्नष्टौ दृश्यानि लसन्ति। भारतवर्षीयाणां कवयित्रीणां रचनासु कुत्रचिद्विषयस्य नूतनत्त्वं कुत्रचिद्वा भाषायाः सारल्यञ्च संलक्ष्येते। तस्याः नाटकेषु अङ्कशब्दस्य व्यवहाराभावाद् दृश्यशब्दस्य प्रयोगोऽर्वाचीनत्त्वं द्रढयति।

**मेघमेदुरमेदनीयम्** - नाटके रामदेवी कालिदासस्य 'मेघदुतम्' इत्यस्य यक्ष-यक्षिनीरस्य प्राचीनस्य शापरहितस्य च जीवनस्य काल्पनिककथां एकत्र आनयति।

**यतीन्द्रयतीन्द्रम्** - लेखिका स्वपतिस्य यतीन्द्रविमलचौधुरी इत्यस्य जीवनं कार्यं च नाटके प्रस्तुतवती अस्ति । लेखिका संस्कृतनाटके यतीन्द्रविमलस्य योगदानस्य विषये प्रकाशं प्रसारयति।

**शङ्करशङ्करम्** - अद्वैतवादिनः शिवावतारस्य शङ्कराचार्यस्य जीवनं दर्शनञ्चाधारीकृत्य ग्रथितमिदं चतुर्दशदृश्योपेतं नाटकम्। इह नाटके कवयित्र्या वर्ण्यन्ते – कथं गुप्तोत्तरयुगे शङ्कराचार्य आसमुद्रहिमाचलं परिभ्रम्य भारतवासिनां हृत्स्पन्दनम् अभूतवान् स्वशास्त्रज्ञानेन शङ्करः तदानीन्तनकालस्य प्रख्यातं पण्डितमूर्धन्यं माधवमिश्रं विज्ञामुभयभारतीं मण्डनस्त्रियमपि च तर्कयुद्धेन पराजितवान् । चतुर्दशदृश्ये दृश्यते शङ्करः केदारं गच्छन् तत्र द्वात्रिंशद्वर्षवयसि सम्पूर्णे स्वस्य परमात्मसायुज्यप्राप्तौ

प्रकृतजीवनस्योपलब्धीः प्रकटितवान् । तेन भारतस्य चतसृषु दिक्षु चत्वारो मठाः संस्थापिताः। तत्र मठेषु ऋग्यजुःसामाथर्वणामध्ययनव्यवस्था कृता।

**देहदीपम्** - नाटके राष्ट्ररक्षायै दिवं गतानां वीराणां संस्मरणं कृतं कवयित्र्या। एकस्य महतो नायकस्य जीवनमाधारीकृत्य लिखितमिदं दृश्यनवकविशिष्टं नाटकम्। स खलु नायको देशाय प्राणान् तत्याज।

अत्र रमया ग्राम्यपरिसरः कार्यस्थली निर्वाचित इत्यस्य प्रमुख्यं वैशिष्ट्यम्। नाटके वर्णितानां केषाञ्चिच्चरित्राणां वैशिष्ट्यानि विदूषकचरित्रेण सङ्गच्छन्ते। अत्र चम्पकवदनः अभ्रप्रतिमश्चेति युवानौ ग्राम्यौ देशरक्षायै बद्धदरावास्ताम्। चम्पकवदनस्य मृत्यावपि देशदीपं सर्वदा प्रज्वलितमासीत्। नाटके रहिमस्य मुखेन कवियित्री ग्राम्यजनानाञ्चिन्ताधारां वर्णयति -

"श्रेष्ठं व्रतं तत् खलु जीवनस्य स्वदेशमातुर्नियतार्चनं यत्।
आलोकरेखा फलमम्बुवायुर्यस्याः सदा रक्षति जीवनं नः॥
धन्यं भवेदर्जनमर्पणेन दानेन धन्यं ग्रहणं हि लोके।
यदर्जितं जीवनमद्य मातुर्देयं तदस्यै बहुमानपूर्वम्।। "[2]

**पल्लीकमलम्** - लोकप्रसिद्धां कथामवलम्ब्य रचितमिदं नवदृश्यात्मकं नाटकम्। कमलकलिका- रूपकुमारयोः प्रेमकथाम् आधारीकृत्य ग्राम्यसंस्कृतिञ्च संलक्ष्य कवयित्री नाटकं व्यलिखित्। नायकस्य रूपकुमारस्य नायिकायाः कमलकलिकायाश्च प्रेम्णः परिणतिः अन्ततो गत्वा परिणयेन सम्पाद्यते। इह नाटके कतिपयवङ्गलोकोक्तीनां संस्कृतानुवादः समुपलभ्यते। दिङ्मात्रमुदाहरणं यथा –

आकाशचन्द्रः पतितः करे मे।
कुक्षौ क्षुधा मुखे लज्जा।
पथि ठक्कुर आद्रियमाणो मस्तकमारोहति" इति।[3]

यदि रूपकस्यास्य सर्वाणि दृश्यानि एकोक्तिमण्डितानि सन्ति, तथापि पञ्चमाङ्कस्य कनककलिकाया एकोक्तौ महती प्रभविष्णुता जागर्ति। लेखिकाया नये इह नाटके अत्यावश्यकं सङ्गीतनिबन्धनम्। पूर्वकथा चलच्चित्रानुवर्तनपूर्वकं पटपरिवर्तनेन पूर्वदृश्ये प्रदर्शिता। नाटकस्य भाषा सरला सुमधुरा च। रूपकत्वेनात्र नास्ति किमपि अभिनवत्वम्।

**युगजीवनम्** - रामकृष्ण-सारदादेवी-विवेकानन्दानां दीव्यजीवनानि तेषां भावादर्शान् चाश्रित्य नाटकमिदं ग्रथितं कवयित्र्या।नाटके दश दृश्यानि सन्ति।

'जीवसेवा शिवसेवा' इति तत्त्वं लेखिका प्रकाशयिष्यते। तथाहि नटी रामकृष्णस्य माञ्जुलवाणीं नाटकस्य प्रारम्भ एवाकथयत् – 'जीवः शिवः शिवो जीवो जीवः शिवः केवलम्' इति। किञ्च, नाटकस्य षष्ठे दृश्ये रामकृष्णस्य वैदान्तिकवाणी श्रूयते – 'ब्रह्म एकमेवाद्वितीयम्" इति। तादृशस्य ब्रह्मणः साक्षादुपलब्धिर्हि सकलदर्शनस्य परमा कथा' इति। अत्र शब्दव्यवहारस्य स्वाधीनता, गीतस्य प्रयोगः, वङ्गीयशब्दानुगमनञ्च संलक्षणीयानि।यथा -' न हि देवपूजा यथेच्छाखेला' इति।

---

[2] आधुनिक संस्कृत साहित्येर रुपरेखाए पृ.९८

[3] पल्लीकमलम्।

**निवेदितानिवेदितम्** - द्वादशदृश्यविभक्ते अस्मिन् नाटके भगिनीनिवेदितायाः जीवनकथा कथ्यते। अस्मिन् नाटके विवेकानन्दस्य प्रियशिष्यायाः मानवकल्याणपरायणायाः निवेदितायाः परिचयः अस्ति। मार्गरिट् एलिजाबेथ् नोबेल् आयर्लैण्ड्-देशस्य निवासी आसीत्। १८९५ ई. वर्षे लण्डने विवेकानन्देन सह मिलित्वा तस्य जीवने अत्यन्तं परिवर्तनं जातम्। फलतः सः स्वदेशं, जातिं, समाजं च, बन्धुजनं च त्यक्त्वा भारतम् आगत्य विवेकानन्देन दर्शितमार्गे आत्मनः समर्पणं कृतवान्।
वीर-करुण-शान्तरसयोः उत्कृष्टः संयोगः नाटके दर्शितः अस्ति। लेखकेन निवेदितस्य स्वामी विवेकानन्दस्य च पात्राणां अतिरिक्तं बेलूर मठस्य सुप्रसिद्धानां भिक्षुणां, स्वामी शिवानन्दस्य, स्वामी नित्यानन्दस्य च पार्श्वपात्राणां वर्णनं कृतम् अस्ति। भगिनीनिवेदितायाः चरित्रम् आदरपूर्वकं प्रेम्णा च चित्रितम् अस्ति।

**अभेदानन्दम्** - रामकृष्णस्य प्रमुख्येषु शिष्येष्वन्यतमस्य अभेदानन्दस्य पवित्रं जीवनं शिरसिकृत्य कवयित्र्या द्वादशदृश्यात्मकमिदं नाटकं लिखितम्। अत्र गुरुं प्रति भक्तिः प्रधानरसत्वेन उपवर्णिता।

**रामचरितमानसम्** - तुलसीदासायाः तावद् रामचरितमानसस्य रचयिता। स तस्य पत्न्या अनुप्राणितः सन् रामचरितमानसं लिलेख। अत्र तस्यैव कथा उपायनीकृता।

**रसमयरासमणिः** - रानीरासमणी बङ्गालस्य आदर्शमहिला आसीत् । साः दरिद्रपरिवारे जातः परन्तु कलिकतानगरस्य धनीपरिवारे विवाहं कृतवती। अत्यन्तं सुन्दरी च अत्यन्तं बुद्धिमान् च आसीत् । भर्तुः मृत्योः अनन्तरं सा विशालसम्पत्त्याः कुशलतापूर्वकं प्रबन्धनस्य दायित्वं स्वीकृतवती । अस्मिन् काले आङ्ग्लसरकारेण सह अनेकवारं विग्रहाः अभवन्, परन्तु सः तान् कुशलतया निबद्धवान् । दक्षिणेश्वरे कालिमन्दिरस्य स्थापनां कृतवाती। अस्मिन् नाटके लेखिका रानीरसमन्याः दूरदर्शिता, तस्याः बुद्धिमत्ता इत्यादीनि च दर्शितवती अस्ति।

**चैतन्यचैतन्यम्** - पञ्चदृश्यसमन्वितमिदं नाटकम्। चैतन्यस्य चारुचरितावली चित्रिता तस्याविर्भावः, बाललीला, दिग्विजयः, कृष्णप्रेम, ईश्वरभक्तिः महासमाधिश्चात्र विषया नाट्यायिता वर्तन्ते।

**संसारामृतम्** - केलिनाम्न्याः दरिद्रपरिवारस्य कन्यायाः दुःखमयं जीवनमवलम्ब्य सप्तदृश्यात्मकमिदं नाटकम्। मयूरनामको कश्चन तस्या बालिकायाः प्रतारणामकरोत्। अनन्तरं प्रतारिता सा बाला तं मयूरनामकमेकं धनिनमुद्वहति। किन्तु स मयूर आसीत् चरित्रहीनः। किन्तु तस्या बालिकायाः संस्पर्शात् स शनैः शनैः कुस्वभावं परित्यज्य शुद्धजीवनं यापितवान्। समाजस्य वास्तवजीवनमत्र प्रतिध्वनितं कवयित्र्या।

**नगरनूपुरम्** - मेखलाभिधानाया अपूर्वसुन्दर्या गणिकायाः कथामाश्रित्य दशदृश्यमयं लिखितमिदं नाटकम्। शृङ्गाररसोऽत्र अङ्गी।

**भारतपथिकम्** - राजाराममोहनरायस्य जीवनकथा पञ्चसु दृश्येषु कथ्यते । राममोहनस्य जन्म १७७४ ई. १० मे-मासस्य हुगलीजिलायाः राधानगरग्रामे अभवत् । पितुः नाम रामकान्त रायः । सः संस्कृत, अरबी, फारसी, ग्रीक, आङ्ग्ल, लैटिन इत्यादिषु विविधभाषासु प्रवीणः आसीत् । १८२७ ई. ब्रह्मधर्मस्य, ब्रह्मसमाजस्य च स्थापनां कृतवान् । फलतः तत्कालीनगवर्नर् जनरल् लॉर्ड बेन्टिन्क् इत्यनेन तस्य निरोधः कृतः । समाजस्य विविधानां अन्धविश्वासानाम् विरुद्धं सः मुख्यभूमिकां स्वीकृतवान् । १८३० ई. विदेशं गत्वा १८३३ ई. ब्रिस्टल्-नगरे रोगेण मृतः । बहुपत्नीत्वस्य, जातिभेदस्य, सतिदाहस्य इत्यादीनां विरोधस्य तस्य वर्णनम् अस्मिन् नाटके कृतम् अस्ति ।

**भारताचार्यः** - भारतस्य द्वितीयराष्ट्रपतेः सर्वपल्लीराधाकृष्णन्महोदयस्य जीवनमस्य नाटकस्य मूलं वस्तु। अपि च, तस्य दार्शनिकी भावनापि अत्र प्रकटिता। द्वादशदृश्यात्मकमिदं नाटकम्।

**अग्निवीणानाटकम्** - नजरुलकवेश्चरितगाथा नाटकेऽस्मिन् वर्णिता। आधुनिकालङ्कारिकदृष्ट्या स्वदेशप्रेमाख्यो रसः अङ्गीरसरूपेण पदं करोति।

**गणदेवतानाटकम्** - नाटकेऽस्मिन् वङ्गदेशस्य श्रेष्ठानाम् औपन्यासिकानां ताराशङ्करवन्द्योपाध्यायानां जीवनचरितमुपजीव्यमस्ति । रमायाः नाटकेषु चरितानां सर्वतिशायि प्राधान्यमुल्लेख्यम्।

**भारततातम्** - महात्मागान्धिनः जीवनकथा अत्र षड्दृश्येषु चर्चा कृता अस्ति। महात्मागान्धी इत्यस्य साम्प्रदायिकैकतायाः संघर्षः, हरिजनप्रेम इत्यादीनि च अस्मिन् नाटके वर्णिताः सन्ति।

**प्रसन्नप्रसादम्** - साधकरामप्रसादस्य जीवनमाधारीकृत्य दशदृश्योपेतं लिखितमिदं रूपकम्।

**व्रह्मचारिणी वेलादेवी** - ऊनविंशत्यधिकनवशतैकसहस्रतमे वर्षे पश्चिमवङ्गान्तर्गते नदीयामण्डले बेलादेवी अजायत। लिलेख वङ्गभाषायां संस्कृतभाषायाञ्च अनेकानि नाटकानि। तेषु नाटकेषु संस्कृतभाषया विरचितं नाटकत्रयम् अनवद्यं व्यतिक्रमि चेति। अर्वाचीनकालस्य कवयित्रीषु बेलादेवी अन्यतमत्वं भजत इत्यत्र नास्ति संशयः। तया विरचितानां नाटकानां विषयवस्तूनि अधस्तात् पर्यालोच्यन्ते- नचिकेतश्चरितम्(१९६७),महीयसी गार्गी, विराड्गृहम्।

**नचिकेतश्चरितम्** -अस्मिन् एकाङ्कीरुपकं कठोपनिषदात् गृहीतवती। पुराणीकथानुसारं मृत्युदेवः यमराजः बुद्धिमान् विद्वान् इति प्रसिद्धः अस्ति । अस्मिन् रूपे नचिकेता तस्मात् अनन्तं शिक्षणं कथं प्राप्तम् इति वर्णितम् अस्ति । नचिकेतस्य व्यवहारेण तस्य चरित्रस्य एतत् रूपं प्रकाश्यते।

**महीयसी गार्गी** - नाट्यकार बेलादेवी कथां बृहदारण्यकोपनिषदात् गृहीतवती । जनकराजस्य राजसभायां वैदिकब्राह्मणविज्ञानविशेषज्ञस्य याज्ञवल्क्यस्य मुनेः ब्रह्मबादिनी गार्गी इत्यस्य च धीमतः विवादः अभवत् । अन्ते तु याज्ञवल्क्यः विजयी अभवत् । परन्तु यावद् मानवसमाजः अस्ति तावत् महान् गार्गी आदरपूर्वकं स्मर्यते।

**विराड्गृहम्** - बेलादेवी महाभारतस्य कथामाश्रित्य एतत् एकाङ्कीरुपकं लिखितवती। पाण्डवाः द्रौपदीसहिताः विराटराजराज्ये छद्मवेशेण शरणं कृतवन्तः । नाटकस्य अन्ते तृतीयपाण्डव-अर्जुनस्य पुत्रस्य अभिमन्योः विराटराजस्य पुत्री उत्तराया सह विवाहः, पाण्डवानां वास्तविकपरिचयः दर्शितः अस्ति ।

**अर्चनापुरी** - वङ्गप्रदेशस्य अङ्गुलिमेयासु प्रख्यातासु कवयित्रीषु अन्यतमा अर्चनापुरी। १९२८ ई. ३० जुलाइमासस्य वङ्गदेशाधिकृतदिनाजपुरमण्डले सा जातः। किन्तु वङ्गान्तर्गतवीरभूमजिल्लान्तःपातिनः सिउड़ीनामके स्थाने सा तस्याः बाल्यजीवनमतिवाहितवती। पञ्चदशतमे वर्षे सा सन्न्यासधर्मं संगृह्यापि संस्कृतसाहित्यविरचनकर्मणि आत्मानं नियोजितवती। अत्रेदमुल्लेखार्हं यत् सा कलिकातास्थितसत्यानन्ददेवायतनस्य पवित्रमातृत्वेन परिचिताभूत् परवर्तीकाले। कारयितृप्रतिभावशादेव तया विरचितेषु साहित्यकर्मसु प्रायेण सर्वाणि एवाध्यात्मिकमूलकानि वर्तन्ते। तेष्वन्यतमानि नाटकानि यथा - कपटसाधुः, पम्पासरोवरस्य वायसभेकौ, कर्षकस्य इच्छाप्राबल्यम्, कौतुकप्रदा परीक्षा, उन्मादस्य चिन्ता चेति।

**कपटसाधुः** - रूपकस्यास्य विषय एवम् साधुवेशधारी कश्चन चौरः स्वात्मानं रक्षितुं ग्राम्यजनानां प्रहारात् पांशुपूर्णेन देहेन जुगुप्समानः साधुवदाचरति। निरपराधाः सर्वे ग्रामवास्तव्यास्तं साधुरिति विचिन्त्य भक्तिपूर्णमनसा तस्य प्रार्थनां ज्ञापयन्ति। अपि च, सर्वे तस्मै नैवेद्यं निवेदयन्ति । भविष्यति दृश्यते यत् स समाधिं लब्धवान्। कस्यचित् पापिनः चौरस्य कथंकारं

प्रकृतसाधुत्वलाभः तथा तस्य च नैतिकमाध्यात्मिकमुत्तरणमत्र अर्चनापुरी रोचिष्णुतया परिवेशितवती। तथाहि साधोः स्वगतोक्तिः – 'एतस्य अर्थः विगतरात्रौ अहमासं मिथ्यासाधुः। अद्याहं तु प्रकृतसाधुः प्रकृतसाधुः प्रकृतसाधुः' इति।[4]

**पम्पासरोवरस्य वायसभेकौ** - काव्यमिदमाध्यात्मिकभावोपेतम्। ईश्वरेच्छया जगदिदं नियतं परिवर्तते। अशुद्धचैतन्योपहितस्य शुद्धचैतन्यात्मकस्य शुद्ध-बुद्ध-मुक्तस्वभावरूपस्येश्वरस्य सर्वव्यापित्वाद् आनन्ताच्च स सर्वस्मिन् क्षुद्रातिक्षुद्रवस्तुन्यपि राजते। तथाह्यगादि कवयित्र्या - "आ ब्रह्मणः कीटपर्यन्तं सर्वमेव भगवतो हि लीलाप्रकाशस्य महत्क्षेत्रम्" इति।[5]

**कर्षकस्य इच्छाप्राबल्यम्** - आत्मोत्सर्गस्य शक्तिर्यदि कस्यचिन्मनसि जागरिता भवति तर्हि स चरमाध्यात्मिकशक्तेः प्रतीकरूपेण ईश्वरसायुज्यं लब्धुमर्हेत् । हाराधननामधेयः कश्चित् कृषकोऽत्र चरमाध्यात्मिकशक्तेः मूर्तविग्रहत्वेन चित्रितः । तस्मिन् कृषके वैराग्यभावो जागरितः। तथाहि कवयित्र्या कथितम्- "अयं कर्षकः तीव्रवैराग्यस्योपमानम्[6]" इतिगुपिनामकः कश्चन पार्थिवस्वार्थं क्षुद्रं परित्यक्तुं नालम्। स हि मन्दवैराग्यस्य प्रतिनिधिः। विद्यते विषयैषणायाः प्राबल्यं गुपौ। अध्यात्मिकभावनया प्रभावितं न जातं तच्चित्तम्। तथा हि उक्तम्– "तद्धि मन्दवैराग्यस्योपमानम्[7]" इति।

**कौतुकप्रदपरीक्षा** - सत्यानन्दस्य जीवनमवलम्ब्य रचितमिदं नाटकम्। सत्यानन्द आसीत् आध्यात्मिकजगत परमः पुरुषः । कथाच्छलेन भक्तानां कृते आत्मतत्त्व-लिप्सायाः पन्थास्तेन निर्देशितः। तस्य साधारणं चित्ताकर्षकं जीवनमस्माकं हृत्सु स्थानं लभमानमस्ति। नाटकेऽस्मिन् कथाकारम् अलौकिकचमत्कारपद्धत्यां स तस्य भक्तवृन्दानां मनःसु आध्यात्मिकताया वाणीं तनोतीति विषयीकरोति सरलया गीर्वाणवाण्या नाट्यकारः।

**उन्मादस्य चिन्ता** - सा ऐश्वरिकचिन्तया चिन्तितो दृश्यते सत्यानन्दः। तस्य ऐकान्तिकसाधनैवास्य नाटकस्य विषयः। तथाहि तस्य स्वगतोक्तिः संस्मरणीया- "जागतिकमाहार्यं न मम प्रकृतमाहार्यम्। भगवद्ध्यानं हि मम प्रकृतमाहार्यम्। भगवद्ध्यानं मम विश्रामः[8]" इति।

**जयश्रीनागः** - पश्चिमवङ्गस्य वर्धमान-नामके स्थाने साम्प्रतं वसति। सा अर्वाचीनकवयित्रीषु एकतमा वर्तते। 'आदिकवेरुद्भावनम्' इत्येकं नाटकं लिखितं प्राचीनवृत्तमवलम्ब्य कवयित्र्या। आदिकवेर्नाम अत्र वाल्मीकिः। व्याधस्य क्रौञ्चवधं दृष्ट्वा वाल्मीकेर्मनसि शोकात्स्वत उत्सारितभावावेगानां प्रकाशो हि रामायणम्। सहसा तन्मुखाद्विनिर्गतः श्लोकोऽयम्-
"मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः"[9] इति। कथंकारं श्लोकोऽयं तत्रभवत आदिकवेर्मुखाद् विनिर्गतं इत्येवं विषयमाश्रित्य तयालिखितमिदं नाटकम्।

---

[4] कपटसाधुःएसत्यानन्दम्एपृ.८।

[5] सत्यानन्दम्ए जानुयारीमासिए १९९१।

[6] सत्यानन्दम्ए मे.जुनमासयोःए१९९०एपृ.५।

[7] सत्यानन्दम्ए मे.जुनमासयोःए१९९०एपृ.५।

[8] सत्यानन्दम्एपृ.४।

[9] वाल्मीकिकृतं रामायणम्।

एतानतिरिच्य 'मातृवन्दनम्', 'चौरनिरूपणम्', 'वधिरजामातृसंवादः' चेति नाटकत्रितयं जयश्रीनागेन व्यरचि । एतानि सर्वाणि नाट्यमञ्चस्थान्यभवन्। किञ्च, एतानि रूपकाणि शिशूनां कृते ग्रथितानि ।

तया कानिचिद् गीत्यालेख्यानि विरचितानि। तेषु उल्लेखमर्हन्ति 'वर्षामङ्गलम्','भारतवन्दनम्', 'मेघदूतम्' चेति। वर्धमान् विश्वविद्यालये 'मेघदूत'मिति आलेख्यगीतम् अभिनीतमभूत्। नाटकमिदं प्रेक्ष्य स्वर्गीयरमारञ्जनमुखोपाध्यायेन नाट्यकर्त्री बहुधा प्रशंसिता।

**गौरीधर्मपालः** - विंशशतकस्य प्रशंसनीयैका कवयित्री आसीद् गौरीधर्मपालः।कलिकातायां सप्तत्रिंशदधिकनवदशतमे वर्षे सा अजायत। आसीत्साध्यापिका लेडिब्रेवर्नमहाविद्यालयस्या।

संस्कृतभाषायां पञ्चविंशतिसंख्यकानि पुस्तकानि सा लिलेखा। आधुनिकविषयमाधारीकृत्य तया रचिता 'तडिद्विरतिः' (load shedding) इति लघुकथापि प्रशंसार्हा। आधुनिक विषयमाधारीकृत्य तया १९८४ जननीनाटकमपि व्यरचि। 'जननीनामकं रूपकन्त्वैकाङ्करूपकम्।

रूपकमिदमारभ्यते एकेन वङ्गीयसंलापेन "गृहिणी ना जननी कि येन एकटा नाम। राजा राजड़ाओ नेइ आर्य पुत्रओ नेइ" इति। अत्र सूत्रधारस्य अभावो नयनयोरापतति। तया मध्यवित्तपरिवारस्य वृत्तमेकं चानवद्यमनोभङ्ग्या मञ्जुलया गिरा न्यरूपि। वास्तवजीवनस्य चित्रं तत्रभवत्या कवयित्र्या समुपस्थापितम्। सर्वधर्मश्रेणिनः प्रति कवेरेकामृतावाणी ध्वनिता- "मानुषमाता भूमिकन्याः वयं पृथिव्याः"[10] इति।

वस्तुतस्तस्याः "शृण्वन्तु विश्वे अमृतस्य पुत्राः" इति औपनिषदिकभावनायां विश्वमैत्रीभावनानुरणितात्र। वस्तुतो 'जननीति शब्देन भारतमाता संस्कृतभाषा पृथिवी वा बोध्यव्या। माता खलु सर्वेषाम् उत्सस्वरूपा। अतस्तस्याः परित्यागो न कर्तव्य इत्येवं तस्या आशयः। यदा सर्वे मातरं परित्यजन्ति, तदा मातावदत्- "किं ब्रवीषि? नास्ति मया प्रयोजनम् ? सर्वेषां दूषणं सहमाना क्षममाणा, सर्वान् अहं धारयामि पोषयामि शिक्षयामि भाषयामि जीवयामि। शयाने स्वप्ने जागरणे नृत्ये गीते शिल्पे वसने तत्समुद्भवे मनने ध्याने ज्ञाने विज्ञाने पुरातने नूतने शोके दुःखे रोगे आरोग्ये उत्सवे व्यसने सर्वदा युष्माकं पार्श्ववर्तिनी अहम्, मामेव बहिष्करोषि? भवतु गच्छामि। मया विना सुखं जीवतं सर्वे"[11]इति।

**जयश्रीचट्टोपाध्यायः** - जयश्रीचट्टोपाध्यायः - पश्चिमबङ्गदेशस्य आधुनिकसंस्कृतलेखिकानां मध्ये एका जयश्रीचट्टोपाध्यायः अस्ति। साः अधुना कवित्वेन प्रसिद्धः अस्ति। तस्या प्रसिद्धा काव्यपुस्तकं "निसङ्गप्रणयः" कोलकाता-नगरस्य संस्कृतपुस्तकभाण्डारात् प्रकाशितम् अस्ति। गीतिकाव्य इत्यपि वक्तुं शक्यते । अस्य काव्यपुस्तकस्य रचनायाः सह रवीन्द्रनाथस्य काव्यस्य विशेषतः वाल्मीकिप्रतिभायाः संस्कृतस्य प्रशंसिता अस्ति। अपि च द्विजेन्द्रलालः, नजरुल इस्लाम इत्यादयः श्यामसंगीतस्य संस्कृते अनुवादं कृतवन्तः। जयश्रीचट्टोपाध्यययाः 'निसङ्गप्राणायः' विंशतिः कविता सन्ति। प्रथमं कविता 'क्वासि दुर्गा' इति । अस्मिन् वर्तमानसमाजस्य सन्दर्भे दुर्गादेव्याः विभिन्नरूपेषु चर्चा कृता अस्ति। अस्मिन् संकलने अन्ये उल्लेखनीयाः कविता सन्ति- 'कलकाता', 'सारदामङ्गलम्', 'सृष्टिराद्येर धातुः', 'जननी', 'शारद्जोत्स्ना', 'पार्वती', 'नारीजागरम्', वर्षाजननी', 'कलकतासु वर्ष' इत्यादयः।

---

- [10] जननीए पृ.२।

[11] जननीएपृ.८।

**उपसंहारः** - कावियत्री अस्य अर्थः काव्यं रचयति स्त्री, यथा पुरुषाः, स्त्रियः अपि काव्यं रचयन्तः आस्ताम्। काश्चन कविः केवलं स्फुटश्लोकं लिखितवन्तः, परन्तु केचन उत्तमगुणव्यवस्थाः अपि रचयन्ति स्म, येषु महाकाव्यानि, चम्पूकाव्यादीनि च सन्ति।

वैदिकयुगे एव स्त्रीकवीनां परम्परा आरब्धा आसीत् । ऋग्वेदे यत्र मन्त्रद्रष्टाऋषीणां दर्शनं भवति तत्र अपालाविश्ववाराकाक्षीवतीघोषादीनां ऋषीनां कन्याः लोपामुद्रादीनां ऋषिपत्न्यश्च वेदमन्त्रदर्शिनः ऋषीरूपेण दृश्यन्ते। श्रद्धा, कामायनी, शची, पौलोमी, अदिति इत्यादयः देवकोटिः कविः। सर्पराग्यादीनां देवमन्वेतरवर्गस्य ऋषिकाः इति वयं मन्यामहे। वैदिककविनां एषा एव परम्परा लौकिकसंस्कृतकाव्ये अपि निरन्तरं प्राप्यते। रामायणस्य, महाभारतस्य, पुराणानां च अनन्तरं संस्कृतकाव्यं अधिकाधिकं सामाजिकं जातम्। ईश्वरसंस्कृतेः, ईश्वरसमाजस्य च सह कवयः मानवसंस्कृतेः मानवसमाजस्य च काव्यविषयं कर्तुं आरब्धवन्तः। यद्यपि अस्मिन् काव्यधारायां पुरुषकविनां वर्चस्वं दृश्यते तथापि सांस्कृतिककाव्यप्रतिभायुक्ताः काश्चन महिलाः अपि पुरुषसमानेन काव्यसृष्टौ निरताः दृश्यन्ते । एवं संस्कृतकाव्यक्षेत्रे स्त्रीलेखकानां दीर्घपरम्परा वर्तते इति उपर्युक्तविमर्शात् स्पष्टं भवति । गद्य, काव्य, नाटक, चम्पू, महाकाव्य, नृत्यनाट्य (आॅपेरा), नाटिका, संगीत, लोकगीत, कथा इत्यादिषु महत्त्वपूर्णविधासु रचनाभिः संस्कृतसाहित्यस्य समृद्धीकरणे अपि महिलाभिः प्रशंसनीयं कार्यं कृतम् अस्ति। प्राचीनमध्ययुगीनकविनां रचनाः पारम्परिकपद्येषु यत्र प्राप्यन्ते, तत्र आधुनिककविभिः स्वरचनासु पारम्परिकश्लोकैः सह गीती, गजल, कजरी, मुक्तछन्द इत्यादीनाम् अबाधितप्रयोगः कृतः अस्ति। सामाजिक-धार्मिक-राष्ट्रीय-सांस्कृतिक-आध्यात्मिक- राजनैतिक- विविधविषयाणां सृष्टिषु पर्याप्तं स्थानं प्राप्तम् अस्ति।

**सन्दर्भः ग्रन्थसूची** -

1. संस्कृत वाङ्मय का वृहद् इतिहास - (7म खण्ड) आचार्य जगन्नाथ पाठक (सम्पा.), उत्तर प्रदेश संस्कृत संस्थान, लखनउ, 2000।

2. अर्वाचीन संस्कृत साहित्य: दशा एवं दिशा - डाँ. मञ्जुलता शर्मा (सम्पा.), परिमल पब्लिकेशन्स, दिल्ली, 2004।

3. आधुनिक संस्कृत काव्य परम्परा - श्री केशव मुसलगाँओकार, वाराणसी।

4. आधुनिक संस्कृत साहित्य के नये भावबोध - डाँ. मञ्जुलता शर्मा, संस्कृत ग्रन्थगार, दिल्ली-अहमदाबाद, 2010।

5. आधुनिक संस्कृत साहित्य (1910-2010) छोटगल्प ओ नाटक - डः ऋता चट्टोपाध्याय,प्रग्रेसिभ पावलिशार्स, कलकाता, 2012।

6. संस्कृत साहित्येः वीसवी शताब्दी - डः राधावल्लभ त्रिपाठी।

7. भारतवर्षे आधुनिकसंस्कृतसाहित्यम् :विहङ्गमदृष्ट्या परिशीलनम् - डः शुभ्रजित् सेन, संस्कृत पुस्तक भण्डार, कोलकाता, 2019।

8. संस्कृत-वाङ्मयस्य इतिहासः - धीरेन्द्रनाथ वन्द्योपाध्याय।

9. विंश-शताब्दी संस्कृत ग्रन्थ सूचीपत्रम् - मिश्रोइभिराज राजेन्द्रः।

10. आधुनिक संस्कृत साहित्य - डः मैत्रैयी कुमारी,ग्रन्थभारती प्रकाशन, दिल्ली, 2022।

11. आधुनिक संस्कृत साहित्येर संक्षिप्त इतिवृत्त - डः शिप्रा राय, संस्कृत वुक डिपो, कलकाता, 2017।

12. अर्वाचीन(आधुनिक) संस्कृत साहित्येर इतिहास 1801-2020 - वनविहारी घोषाल, पारुल प्रकाशनी प्राइभेट लिमिटेड, कलकाता, आगरतला।

13. आधुनिकसंस्कृतसाहित्ये वीरेन्द्रकुमारभट्टाचार्यस्य कलापिका/सनेट।

14. आधुनिक संस्कृत काव्य की परिक्रमा -डाँ. मञ्जुलता शर्मा, राष्ट्रीयसंस्कृतसंस्थान(मानितविश्वविद्यालय), नवदेहली, 2011।

15. अर्वाचीन संस्कृत साहित्य - डाँ. राजमङ्गल यादव, जे. पी. पब्लिशिंग हाउस, दिल्ली, 2015 ।

16. Modern Sanskrit Literature Tradition and Innovations : Edited by S.B. Raghunath Acharya.

**अन्तर्जालः** -

1. https://sanskritbhasi.blogspot.com/2014/08/blog-post.html?m=1
2. https://www-sanskrit-nic-in.translate.goog/ASSP/index.html?_x_tr_sl=en&_x_tr_tl=hi&_x_tr_hl=hi&_x_tr_pto=tc
3. https://www.millioncontent.com/2021/01/blog-post_872.html